श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्री भरद्वाजमुनि कृतम्

# ॥ श्री नृसिंह द्वात्रिंशत् बीजमाला स्तोत्रम् ॥

*This document* has been prepared by*

***Sunder Kidāmbi***

*with the blessings of*

श्री रङ्गरामानुजमहादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्री नृसिंह द्वात्रिंशत् बीजमाला स्तोत्रम् ॥

उद्गीताढ्यं महाभीमं त्रिनेत्रञ्चोग्र विग्रहम्।
उज्ज्वलं तं श्रियाजुष्टं श्रीं क्ष्रौं ह्रीं नृहरिं भजे॥ १ ॥

ग्रन्थान्त वेद्यं देवेशं गगनाश्रय विग्रहम्।
गर्जनात्रस्त विश्वाण्डं श्रीं क्ष्रौं ह्रीं नृहरिं भजे॥ २ ॥

वीथिहोत्रेक्षणं वीरं विपक्षक्षयदीक्षितम्।
विश्वंबरं विरूपाक्षं श्रीं क्ष्रौं ह्रीं नृहरिं भजे॥ ३ ॥

रङ्गनाथं दयानाथं दीनबन्धुं जगद्गुरुम्।
रणकोलाहलं धीरं श्रीं क्ष्रौं ह्रीं नृहरिं भजे॥ ४ ॥

मन्त्रराजासनारूढं मार्ताण्डोज्ज्वल तेजसम्।
मणिरत्न किरीटाढ्यं श्रीं क्ष्रौं ह्रीं नृहरिं भजे॥ ५ ॥

हाहाहूह्वादि गन्धर्वैः स्तूयमान पदांबुजम्।
उग्ररूपधरं देवं श्रीं क्ष्रौं ह्रीं नृहरिं भजे॥ ६ ॥

विधि वेद प्रदं वीरं विघ्ननाशं रमापतिम्।
वज्रखड्गधरं धीरं श्रीं क्ष्रौं ह्रीं नृहरिं भजे॥ ७ ॥

विष्णु शब्ध दलस्तम्भं दुष्टराक्षस नाशनम्।
दुर्निरीक्षं दुराधर्षं श्रीं क्ष्रौं ह्रीं नृहरिं भजे॥ ८ ॥

ज्वलत्पावकसङ्काशं ज्वालामाला मुखांबुजम्।
दारिद्र्य नाशनं श्री तं श्रीं क्ष्रौं ह्रीं नृहरिं भजे॥ ९ ॥

लं बीजं देवतानाथं दीर्घवृत्त महाभुजम्।
लक्ष्म्यालिङ्गित वक्षस्कं श्रीं क्ष्रौं ह्रीं नृहरिं भजे॥ १० ॥

तन्त्रीभूज जगत्कृत्स्नं धर्मवैकुण्ठ नायकम्।
मन्त्रजापक सान्निध्यं श्रीं क्ष्रौं ह्रीं नृहरिं भजे॥ ११ ॥

सर्वाण्ड कोश मालाढ्यं सर्वाण्डान्तर वासिनम्।
अष्टास्यकण्ठ भेरण्डं श्रीं क्ष्रौं ह्रीं नृहरिं भजे॥ १२ ॥

तोमराङ्कुश वज्राणां सम दंष्ट्रैर्मुखैः स्थितम्।
शत्रुक्षयकरं व्याघ्रं श्रीं क्ष्रौं ह्रीं नृहरिं भजे॥ १३ ॥

मुनिमानस सञ्चारं भुक्ति मुक्ति फलप्रदम्।
हयास्यं ज्ञानदातारं श्रीं क्ष्रौं ह्रीं नृहरिं भजे॥ १४ ॥

कं शब्द कङ्कणोपेतं कमलायत लोचनम्।
सर्वैश्वर्यप्रदं क्रोडं श्रीं क्ष्रौं ह्रीं नृहरिं भजे॥ १५ ॥

नृलोक रक्षणपरं भूतोच्चाटन तत्परम्।
आञ्जनेयमुखं वीरं श्रीं क्ष्रौं ह्रीं नृहरिं भजे॥ १६ ॥

सितवर्णं दीर्घनासं नासाभरण भूषितम्।
गरुडास्यं महाधीरं श्रीं क्ष्रौं ह्रीं नृहरिं भजे॥ १७ ॥

म्हं म्हं म्हं शब्दसहितं मानवाराधनोत्सुकम्।
भल्लूक वक्त्रं भीतिघ्नं श्रीं क्ष्रौं ह्रीं नृहरिं भजे॥ १८ ॥

भीमाक्ष नासिकोपेतं वेदग्रहण तत्परम्।
धरणीधृत मुत्सङ्गं श्रीं क्ष्रौं ह्रीं नृहरिं भजे॥ १९ ॥

षड्वक्त्र पूजिताङ्घ्र्यब्जं धृष्टकोद्धृत मण्डलम्।
कोमलाङ्गं महासत्वं श्रीं क्ष्रौं ह्रीं नृहरिं भजे॥ २० ॥

णंकार किङ्किणी जालं ज्ञानमूर्तिं धरापतिम्।
वराहाङ्गं मुदाराङ्गं श्रीं क्ष्रौं ह्रीं नृहरिं भजे॥ २१ ॥

भयघ्नं सर्वभूतानां प्रह्लादाभीष्ट दायिनम्।
नृसिंहस्तम्भ संबोध्यं श्रीं क्ष्रौं ह्रीं नृहरिं भजे॥ २२ ॥

द्रव्य याच्ञापरं विप्रं बलिमानमुषं हरिम्।
वामनं रूपमास्थाय श्रीं क्ष्रौं ह्रीं नृहरिं भजे॥ २३ ॥

मृत्युरूपं क्षत्रियाणां मुग्धस्निग्धमुखांबुजम्।
जामदग्न्यं परं देवं श्रीं क्ष्रौं ह्रीं नृहरिं भजे॥ २४ ॥

द्युं शब्दयुक्त कोदण्डं दुष्टरावण मर्दनम्।
रामं कमलपत्राक्षं श्रीं क्ष्रौं ह्रीं नृहरिं भजे॥ २५ ॥

मृदङ्गगीतप्रणवश्रवणासक्तमानसम्।
बलरामं हलधरं श्रीं क्ष्रौं ह्रीं नृहरिं भजे॥ २६ ॥

द्युं द्युं द्युं द्युं वेणु नादं ब्रह्मरुद्रादि सेवितम्।
यशोदा तनयं कृष्णं श्रीं क्ष्रौं ह्रीं नृहरिं भजे॥ २७ ॥

नलिनाक्षं अग्निरूपं म्लेच्छनाशन तत्परम्।
ज्वालामालापूरिताङ्गं श्रीं क्ष्रौं ह्रीं नृहरिं भजे॥ २८ ॥

मानायकं महासत्वं ममाभीष्ट प्रदायकम्।
मद्रक्षणपरं शान्तं श्रीं क्ष्रौं ह्रीं नृहरिं भजे॥ २९ ॥

मृत्युटङ्कार संयुक्तं शाङ्र्गधन्वान मीश्वरम्।
सद्वस्त्राभरणोपेतं श्रीं क्ष्रौं ह्रीं नृहरिं भजे॥ ३० ॥

यन्नामस्मरणात्सर्व भूतवेताल राक्षसाः।
शत्रवः प्रलयं यान्ति श्रीं क्ष्रौं ह्रीं नृहरिं भजे॥ ३१ ॥

हं बीजं नादं सर्वेशं शरणं वरयाम्यहम्।
उपायभूतं लक्ष्मीशं श्रीं क्ष्रौं ह्रीं नृहरिं भजे॥ ३२ ॥

## फलश्रुतिः

भरद्वाजकृतं स्तोत्रं मन्त्रजार्णव संभवम्।
सकृत्पठनमात्रेण सर्वदुःखविनाशनम्॥ १ ॥

राजवश्यं जगद्वश्यं सर्ववश्यं भवेद्ध्रुवम्।
भूतप्रेत पिशाचादि व्याधि दुर्भिक्षतस्कराः॥ २ ॥

दूरादेव प्रणश्यन्ति सत्यं सत्यं न संशयः।
विद्यार्थी लभते विद्यां धनार्थी लभते धनम्॥ ३ ॥

सर्वार्थी सर्वमाप्नोति मोक्षार्थी मोक्षमाप्नुयात्।
यंयं कामयते चित्तं तं तं प्राप्नोति निश्चयम्॥ ४ ॥

॥ इति श्री नृसिंह द्वात्रिंशत् बीजमाला स्तोत्रं संपूर्णम् ॥